द्वौ तु जागतौ यस्याः सा जागते जगती, तैष्टुभे त्रिष्टुप्। वैराजौ जागतौ चाभिसारिणी" अनु०क्र० उक्ते वैदिकच्छन्दोभेदे स्त्री यस्याः वैराजौ द्वौ पादौ द्वौ च पादौ जागतौ साऽभिसारिणीति तदर्थः।

**अभिसृष्ट** पु० अभि+सृज–क्त। १दत्ते, २उत्सृष्टे, ३त्यक्ते च

**अभिस्वर्** न० स्वृ–भावे–क्विप् स्वः अभितः स्वः स्वरणं शब्दो वा यस्य। अभितः स्वरयुक्ते स्तोत्रभेदे "अभिस्वरा निषदा गा अवस्यवः" ऋ०२,२१,५ अभितः स्वः स्वरः शब्दनं वा यस्य तेन स्तोत्रेण" भा०। "स्तोत्रं नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा" ऋ०८,९७,१२ "अभिस्वरा अभिस्वरणेन स्तोत्रेण" भा०। [रथस्य ह्वयोरभिरभिस्वरे" श्रुतिः।

**अभिस्वर** पु० अभि+स्वृ–अप्। आभिमुख्येन प्रेरणे "स्यात

**अभिहत** त्रि० अभि+हन–क्त। १ अभिघातसंयोगवति। "सोदीर्णोमूर्द्धभिहतो वक्त्रमापद्य मारुतः" शिक्षा। २ ताडिते "परस्परेणाभिहता विनेदुः" पु०। ३ गुणिते च। "अन्योन्यहाराभिहतौ हरांशौ" लीला०।

**अभिहरण** न० अभि+हृ–ल्युट्। १आभिमुख्याहरणे "कार्मुकाभिहरणाय मैथिलः" रघुः। २विवाहादौ यौतकदाने च।

**अभिहव** पु० अभिह्वयते अभि+ह्वे–अप् संप्रसारणञ्च। आभिमुख्येनाह्वाने हु–अप्। २ सर्व्वतोहोमे।

**अभिहस्य** त्रि० अभि+हस–यत्। उपहसनीये "यस्ते मदोऽव केशोविकेशो येनाभिहस्यं पुरुषं कृणोषि" अथ०६,३०,२, ल्यप्। २ उपहस्येत्यर्थे अव्य०।

**अभिहार** पु० अभि+हृ–घञ्। १ अपचिकीर्षया अभिगम्याक्रमणे, २ साक्षाच्चौर्य्ये, ३ अभियोगे, ४ कवचादिधारणे ५ संश्लेषणे ६ मेलने च। "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" सां०का०। "समानाभिहारात् तोयदविमुक्तानुदविन्दून् जलाशये न पश्यति" सा० कौ०।

**अभिहित** त्रि० अभि+धा–क्त। १ अभिधया वृत्त्या बोधिते २उक्ते। "अभिहिते प्रथमा" वा०। अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः क्वचिदव्ययेन। तत्तद्गतसंख्याया अभिहितत्वे कर्त्तृकर्म्मणोरभिहितत्वमिति नैयायिकाः भवति च ग्रामं गच्छति चैत्रः, ग्रामो गम्यते चैत्रेणेत्यादौ कर्तृकर्मगतसंख्याया आख्यातेनाभिधानमतस्तत्र प्रथमोपपत्तिः। तथाचाख्यातार्थसंख्यावत्त्वेन कर्त्तृकर्म्मणोः अभिहितत्वम्। वैयाकरणमते कर्त्तृकर्मणोरेव आख्यातेनाभिधानमिति भेदः। "अनभिहिते" पा० अनभिहिते इत्यधिकारे कर्मादौ द्वितीयादि "इति प्रविश्याभिहिता द्विजन्मना" कु०अस्य वच्यर्थकतया गौणे कर्मणि क्त। वचनोद्देश्यत्वेन तस्याः कर्म्मत्वादुक्तता। गौणकर्म्मणोऽप्रयोगे तु मुख्यकर्म्मणोवचनादेरुक्तता। "वासुदेवेनाभिहिते वाक्ये तेन महात्मना" भा०उ०प०।

**अभिहितान्वय** अभिहितानामन्वयः। अभिधावृत्त्या(शक्त्या)उपस्थापितानामर्थानां परस्परसंबन्धे। तथा हि अभिधावृत्त्या पदार्थबोधने द्विधा प्रकारः। अन्विताभिधानम् अभिहितान्वयश्च तत्र मीमांसका एवमाहुः "सर्वेषां शब्दानां व्यवहारादेव प्रथमं व्युत्पत्तिर्गृह्यते इतरोपायानां शब्दव्युत्पत्त्यधीनत्वात्। तथा हि प्रयोजकस्य वाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यवृद्धप्रवृत्तिरेव प्रयोजनमवधारयति न चाकिञ्चित्कुर्व्वतस्तादर्थ्यं सम्भवतीति तद्वाक्यजन्यं प्रवृत्त्यनुकूलं कार्य्यताज्ञानमेव कल्पयति स्वप्रवृत्तौ बालेन कार्यताज्ञानस्य हेतुत्वावधारणात् तथा च प्रेक्षावत् प्रवृत्तिः कार्यताज्ञानाधीना प्रवृत्तित्वात् मदीयप्रवृत्तिवदित्यनुमीयते तत्र कारणान्तरानुपस्थितेः शब्दस्यैवोपस्थितेस्तस्यैव कार्यताज्ञानहेतुत्वमवधार्य्य तत्रैव शक्तिं कल्पयति पश्चाच्चान्वयव्यतिरेकाभ्यां क्रियाकारकपदानां कार्य्यान्वितततदर्थेषु शक्तिं गृह्णाति प्रथमं गृहीतसामान्यशक्त्यनुरोधात्। ततश्च पदं कार्य्यान्वितज्ञानशक्तं पदत्वादिति सामान्यतोऽवगतः स्वार्थः, विशेषः पुनर्नाधिगतः स च उत्तरकाले सुहृदुपदेशादिभिरवगम्यते। अतः प्रवृत्तिपराणामेव शब्दानां प्रवर्त्तकज्ञानजनकत्वम् तच्च क्वचित् साक्षात् क्वचित्परम्परया कार्य्यान्वितम् तत्र साक्षात् यजेत घटमानयेत्यादौ वाक्ये। विधिशेषीभूतार्थवादादौ तु परम्परया। कार्य्यान्वय इति सर्व्वत्र वेदे कार्य्यान्वितस्वार्थबोधकता स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थसंसर्गग्रहेण संसर्गस्य व्यवहारः न तु संसर्गग्रहेण, तथा च व्यवहारेणैवानुमिते इतरान्वितज्ञाने कारणत्वग्रहात् तत्रैव शक्तिर्गृह्यते उपस्थितत्वात् नचाग्रे तत्त्यागः हेत्वभावात्। न तु पदार्थमात्रे शक्तिग्रहः व्यवहारात्तस्यानुपस्थितेः उपायान्तरात्तदुपस्थित्यन्तरकल्पने मानाभावात्। एवञ्च इतरान्वितस्वार्थज्ञानशक्तत्वेन ज्ञातं पदं स्वार्थान्वयानुभावकमिति वाक्यार्थ एव शक्त्याऽभिधीयते इत्यन्विताभिधानवादिनः"। अभिहितान्वयवादिनस्तु नैयायिकादयस्तेषामयमाशयः। इतरा–